# Gayatri Lahari

# ગાયત્રી લહરી

## Document Information

```
Text title : Gayatri Lahari

File name : gAyatrI_laharI.itx

Category : laharI, devii, gAyatrI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Gayatri Mahavijnana -Pandit Rama Sharma Acharya,

Latest update : Mar. 14, 2014

Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ગાયત્રી લહરી

અમન્દાનન્દેનામરવરગૃહે વાસ નિરતાં-
નરં ગાયન્તં યા ભુવિ ભવભયાત્ત્રાયત ઇહ ।
સુરેશૈઃ સમ્પૂજ્યાં મુનિગણનુતાં તાં સુખકરીં
નમામો ગાયત્રીં નિખિલમનુજાઘૌઘશમનીમ્ ॥ ૧॥

અવામા સંયુક્તં સકલમનુજૈર્જાપ્યમભિતો-
હ્યપાયાત્પાયાદ્ભૂરથ ભુવિ ભુવઃ સ્વઃ પદમિતિ ।
પદં તન્મે પાદાવવતુ સવિતુશ્ચૈવ જઘને-
વરેણ્યં શ્રોણિં મે સતતમવતાન્નાભિમપિ ચ ॥ ૨॥

પદં ભર્ગો દેવસ્ય મમ હૃદયં ધીમહિ તથા-
ગલમ્પાયાન્નિત્યં ધિય ઇહ પદં ચૈવ રસનામ્ ।
તથા નેત્રે યોઽવ્યાદલકમવતાન્નઃ પદમિતિ-
શિરોદેશં પાયાન્મમ તુ પરિતશ્ચાન્તિમપદમ્ ॥ ૩॥

અયે દિવ્યે દેવિ ત્રિદશનિવહૈર્વન્દિતપદે
ન શેકુસ્ત્વાં સ્તોતું ભગવતિ મહાન્તોઽપિ મુનયઃ ।
કથંકારં તર્હિસ્તુતિતતિરિયં મે શુભતરા-
તથા પૂર્ણા ભૂયાત્ ત્રુટિપરિયુતા ભાવરહિતા ॥ ૪॥

ભજન્તં નિર્વ્યાજં તવ સુખદમન્ત્રં વિજયિનં
જનં યાવજ્જીવં જપતિ જનનિ ત્વં સુખયસિ ।
ન વા કામં કાચિત્ કલુષકણિકાઽપિ સ્પૃશતિ તં
સંસારં સંસારં સરતિ સહસા તસ્ય સતતમ્ ॥ ૫॥

દધાનાં હ્યાધાનં સિતકુવલયાસ્ફાલનરુચાં
સ્વયં વિભ્રાજન્તીં ત્રિભુવનજનાહ્લાદનકરીમ્ ।
અલં ચાલં ચાલં મમ ચકિતચિત્તં સુચપલં
ચલચ્ચન્દ્રાસ્યે ત્વદ્વદનરુચમાચામય ચિરમ્ ॥ ૬॥

લલામે ભાલે તે બહુતર વિશાલેઽતિ વિમલે
કલાચઞ્ચચ્ચાન્દ્રી રુચિરતિલકાવેન્દુકલયા ।
નિતાન્તં ગોમાયા નિવિડ તમસો નાશ વ્યસના
તમો મે ગાઢં હિ હૃદયસદનસ્થં ગ્લપયતુ ॥ ૭॥

અયે માતઃ કિન્તે ચરણ-શરણં સંશ્રયવતાં-
જનાનામન્તસ્થો વૃજિન હુતભુક્ પ્રજ્વલતિ યઃ ।
તદસ્યાશુ સમ્યક્ પ્રશમનહિતાયૈવ વિધૃતં-
કરે પાત્રં પુણ્યં સલિલભરિતં કાષ્ઠરચિતમ્ ॥ ૮॥

અથાહોસ્વિન્માતઃ સરિદધિપતેઃ સારમખિલં
સુધારૂપં કૂપં લઘુતરમનૂપં કલયતિ ।
સ્વભક્તેભ્યો નિત્યં વિતરસિ જનોદ્ધારિણિ શુભે
વિહીને દીને મય્યપિ કૃપય કિંચિત્ કરુણયા ॥ ૯॥

સદૈવ ત્વત્પાણૌ વિધૃતમરવિન્દં દ્યુતિકરં
ત્વિદં દર્શં દર્શં રવિશશિસમં નેત્રયુગલમ્ ।
વિચિન્ત્ય સ્વાં વૃત્તિં ભ્રમવિષમજાલેઽસ્તિ પતિત-
મિદં મન્યે નોચેત્ કથમિતિ ભવેદર્ધ-વિકચમ્ ॥ ૧૦॥

સ્વયં માતઃ કિંવા ત્વમસિ જલજાનામપિ ખનિ-
ર્યતસ્તે સર્વાઙ્ગં કમલમયમેવાસ્તિ કિમુ નો ।
તથા ભીત્યા તસ્માચ્છરણમુપયાતઃ કમલરાટ્ -
પ્રયુઞ્જાનોઽશ્રાન્તં ભવતિ તદિહૈવાસનવિધૌ ॥ ૧૧॥

દિવૌકોભિર્વન્દ્યે વિકસિત સરોજાક્ષિ સુખદે
કૃપાદૃષ્ટેર્વૃષ્ટિઃ સુનિપતતિ યસ્યોપરિ તવ ।
તદીયા વાઞ્છા કિં દ્રુતમનુ વિધેયાસ્તિ સકલા
અતોમન્તોસ્તન્તૂન્ મમ સપદિ છિત્વાઽમ્બ સુખય ॥ ૧૨॥

કરેઽક્ષાણાં માલા પ્રવિલસતિ યા તેઽતિવિમલે
કિમર્થં સા કાન્ વા ગણયસિ જનાન્ ભક્તિ નિરતાન્ ।
જપન્તી કં મન્ત્રં પ્રશમયસિ દુઃખં જનિજુષા
મયે કા વા વાઞ્છા તવ વરિવૃતિ ત્વત્ર વરદે ॥ ૧૩॥

ન મન્યે ધન્યેઽહં ત્વવિતથમિદં લોકગદિતં

મમાત્રોક્તિર્મત્વા કમલમિવ ફુલ્લં તવ કરમ્ ।
વિજૃમ્ભા સંયુક્ત દ્યુતિમયમિદં કોકનદમિ-
ત્યરં જાનાનેયં મધુકરતતિઃ સંવિલસતિ ॥ ૧૪॥

મહામોહામ્ભોધૌ મમ નિપતિતા જીવનતરિ-
ર્નિરાલમ્બા દોલા ચલિત દુરવસ્થામધિગતા ।
જલાવર્ત વ્યાલો ગ્રસિતુમભિતો વાઞ્છતિ ચ તાં
કરાલમ્બં દત્વા ભગવતિ દ્રુતં તારય શિવે ॥ ૧૫ ।
દધાનાસિત્વં યત્ સ્વવપુષિ પયોધારિ-યુગલ-
મિતિ શ્રુત્વા લોકૈર્મમ મનસિ ચિન્તા સમભવત્ ।
કથં સ્યાત્ સા તસ્માદલક લતિકા મસ્તક ભુવિ
શિરોદ્યાં હૃદ્યેયં જલદપટલી ખેલતિ કિલ ॥ ૧૬॥

તથા તત્રૈવોપસ્થિતિમપિ નિશીથિન્યધિપતેઃ
પ્રપશ્યામિ શ્યામે સહ સહચરૈસ્તારક ગણૈઃ ।
અહોરાત્રઃ ક્રીડા પરવશમિતાસ્તેઽપિ ચકિતા-
શ્ચિરં ચિક્રીડન્તે તદપિ મહદાશ્ચર્ય-ચરિતમ્ ॥ ૧૭॥

યદાહુસ્તં મુક્તા પટલ જટિતં રત્ન મુકુટં
ન ધત્તે તેષાં સા વચનરચના સાધુપદવીમ્ ।
નિશૈષા કેશાસ્તુ નહિ વિગત વેશા ધ્રુવમિતિ
પ્રસન્નાઽધ્યાસન્ના વિધુપરિષદેષા વિલસતિ ॥ ૧૮॥

ત્રિબીજે હે દેવિ ત્રિ પ્રણવસહિતે ત્ર્યક્ષરયુતે
ત્રિમાત્રા રાજન્તે ભુવનવિભવે હ્યોમિતિપદે ।
ત્રિકાલં સંસેવ્યે ત્રિગુણવતિ ચ ત્રિસ્વરમયિ
ત્રિલોકેશૈઃ પૂજ્યે ત્રિભુવનભયાત્ત્રાહિ સતતતમ્ ॥ ૧૯॥

ન ચન્દ્રો નૈવેમે નભસિ વિતતા તારકગણાઃ
ત્વિષાં રાશી રમ્યા તવ ચરણયોરમ્બુનિચયે ।
પતિત્વા કલ્લોલૈઃ સહ પરિચયાદ્વિસ્તૃતિમિતા
પ્રભા સૈવાઽનન્તા ગગનમુકુરે દીવ્યતિ સદા ॥ ૨૦॥

ત્વમેવ બ્રહ્માણી ત્વમસિ કમલા ત્વં નગસુતા
ત્રિસન્ધ્યં સેવન્તે ચરણયુગલં યે તવ જનાઃ ।
જગજ્જાલે તેષાં નિપતિત જનાનામિહ શુભે

સમુદ્ધારાર્થં કિં મતિમતિ મતિસ્તે ન ભવતિ ॥ ૨૧॥

અનેકૈઃ પાપૌઘૈર્લુલિત વપુષં શોક સહિતં
લુઠન્તં દીનં માં વિમલ પદયો રેણુષુ તવ ।
ગલદ્બાષ્પં શશ્વદ્ જનનિ સહસાશ્વાસનવચો
બ્રુવાણોત્તિષ્ઠ ત્વં અમૃતકણિકાં પાસ્યસિ કદા ॥ ૨૨॥

ન વા માદૃક્ પાપી નહિ તવ સમા પાપહરણી
ન દુર્બુદ્ધિર્માદૃક્ ન ચ તવ સમા ધી વિતરિણી ।
ન માદૃગ્ ગર્વિષ્ઠો નહિ તવ સમા ગર્વહરણી
હૃદિ સ્મૃત્વા હ્યેવં મામયિ કુરુ યથેચ્છા તવ યથા ॥ ૨૩॥

દરીધર્તિ સ્વાન્તેઽક્ષર વર ચતુર્વિંશતિમિતં
ત્વદન્તર્મન્ત્રં યત્ત્વયિ નિહિત ચેતો હિ મનુજઃ ।
સમન્તાદ્ ભાસ્વન્તં ભવતિ ભુવિ સઞ્જીવનવનં
ભવામ્ભોધેઃ પારં વ્રજતિ સ નિતાન્તં સુખયુતઃ ॥ ૨૪॥

ભગવતિ લહરીયં રુદ્રદેવ પ્રણીતા
તવ ચરણ સરોજે સ્થાપ્યતે ભક્તિભાવૈઃ ।
કુમતિતિમિરપઙ્કસ્યાઙ્કમગ્નં સશઙ્કં
અયિ ખલુ કુરુ દત્વા વીતશઙ્કં સ્વમઙ્કમ્ ॥ ૨૫॥

॥ ઇતિ શ્રી રુદ્રદેવ વિરચિત ગાયત્રી લહરી સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Gayatri Lahari*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*